# SHRIMAD BHAGWAT RASIK KUTUMB

श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

## Uddhav Geeta, Second Sopan(11.13)



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

**नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।**
**देवीं(म्) सरस्वतीं(म्) व्यासं(न्), ततो जयमुदीरयेत्॥**

**nārāyaṇaṃ(n) namaskṛtya, naraṃ(ñ)caiva narottamam**

**devīṃ(m) sarasvatīṃ(m) vyāsaṃ(n), tato jayamudīrayet**

**नामसङ्कीर्तनं(म्) यस्य, सर्वपापप्रणाशनम्।**
**प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्॥**

**nāmasaṅkīrtanaṃ(m) yasya, sarvapāpapraṇāśanam**

**praṇāmo duḥkhaśamanas, taṃ(n) namāmi hariṃ(m) param**

**श्रीमद्भागवतमहापुराणम्**

**एकादशः स्कन्धः**

**॥अथ त्रयोदशोऽध्याय: ॥**

**Śrīmadbhāgawatamahāpurāṇam**

**Ekādaśḥ skandhaḥ**

**.. Atha trayodaśo'dhyādaśoyaḥ - 13 ..**

## श्रीभगवानुवाच

**सत्त्वं(म्) रजस्तम इति , गुणा बुद्धेर्न चात्मनः ।**
**सत्त्वेनान्यतमौ हन्यात् , सत्त्वं(म्) सत्त्वेन चैव हि ॥ 1॥**

śrībhagavānuvāca

sattvaṃ(m) rajastama iti, guṇā buddherna cātmanaḥ .

sattvenānyatamau hanyāt, sattvaṃ(m) sattvena caiva hi .. 1..

sattva+nān+yatamau

सत्त्वाद् धर्मो भवेद् वृद्धात्, पुं(व्)सो मद्भक्तिलक्षणः ।

सात्त्विकोपासया सत्त्वं(न्), ततो धर्मः(फ्) प्रवर्तते ॥ 2॥

Sattvād dharmo bhaved vṛddhāt, puṃ(v)so madbhaktilakṣaṇaḥ .

sāttvikopāsayā sattvaṃ(n), tato dharmaḥ(ph) pravartate .. 2..

sāttviko+pāsayā

धर्मो रजस्तमो हन्यात्, सत्त्ववृद्धिरनुत्तमः ।

आशु नश्यति तन्मूलो, ह्यधर्म उभये हते ॥ 3॥

dharmo rajastamo hanyāt , sattvavṛddhiranuttamaḥ .

āśu naśyati tanmūlo, hyadharma ubhaye hate .. 3..

sattva+vṛddhi+ ranuttamaḥ

आगमोऽपः(फ्) प्रजा देशः(ख्), कालः(ख्) कर्म च जन्म च ।

ध्यानं(म्) मन्त्रोऽथ सं(व्)स्कारो, दशैते गुणहेतवः ॥ 4॥

āgamo'paḥ(ph) prajā deśaḥ(kh), kālaḥ(kh) karma ca janma ca .

dhyānaṃ(m) mantro'tha saṃ(v)skāro, daśaite guṇahetavaḥ .. 4..

तत्तत्सात्त्विकमेवैषां(म्), यद् यद् वृद्धाः(फ्) प्रचक्षते ।

निन्दन्ति तामसं(न्) तत्तद्, राजसं(न्) तदुपेक्षितम् ॥ 5॥

tattatsāttvikamevaiṣāṃ(m), yad yad vṛddhāḥ(ph) pracakṣate .

nindanti tāmasaṃ(n) tattad, rājasaṃ(n) tadupekṣitam .. 5..

tattat+sāttvika+mevaiṣāṃ(m)

सात्त्विकान्येव सेवेत, पुमान् सत्त्वविवृद्धये ।
ततो धर्मस्ततो ज्ञानं(म्), यावत् स्मृतिरपोहनम् ॥ 6॥

**sāttvikānyeva seveta, pumān sattvavivṛddhaye .**
**tato dharmastato jñānaṃ(m), yāvat smṛtirapohanam .. 6..**

sāttvikān+yeva, smṛti+rapohanam

वेणुसङ्घर्षजो वह्निर्- दग्ध्वा शाम्यति तद्वनम् ।
एवं(ङ्) गुणव्यत्ययजो, देहः(श्) शाम्यति तत्क्रियः ॥ 7॥

**veṇusaṅgharṣajo vahnir-dagdhvā śāmyati tadvanam .**
**evaṃ(ṅ) guṇavyatyayajo, dehaḥ(ś) śāmyati tatkriyaḥ .. 7..**

veṇu+saṅgharṣajo, guṇa+vyat+yayajo

उद्धव उवाच
विदन्ति मर्त्याः(फ्) प्रायेण, विषयान् पदमापदाम् ।
तथापि भुञ्जते कृष्ण, तत् कथं(म्) श्वखराजवत् ॥ 8॥

**uddhava uvāca**
**vidanti martyāḥ(ph) prāyeṇa, viṣayān padamāpadām .**
**tathāpi bhuñjate kṛṣṇa, tat kathaṃ(m) śvakharājavat .. 8..**

padamā+padām, śvakharā+ javat

श्रीभगवानुवाच
अहमित्यन्यथाबुद्धिः(फ्), प्रमत्तस्य यथा हृदि ।
उत्सर्पति रजो घोरं(न्), ततो वैकारिकं(म्) मनः ॥ 9॥

**śrībhagavānuvāca**
**ahamityanyathābuddhiḥ(ph), pramattasya yathā hṛdi .**
**utsarpati rajo ghoraṃ(n), tato vaikārikaṃ(m) manaḥ .. 9..**

aha+ mityan+ yathābuddhiḥ(ph), utsar+ pati

रजोयुक्तस्य मनसः(स्), सं(ङ्)कल्पः(स्) सविकल्पकः ।

ततः(ख्) कामो गुणध्यानाद्, दुःसहः(स्) स्याद्धि दुर्मतेः ॥10॥

rajoyuktasya manasaḥ(s), saṅ(ṅ)kalpaḥ(s) savikalpakaḥ .

tataḥ(kh) kāmo guṇadhyānād, duḥsahaḥ(s) syāddhi durmateḥ .. 10..

guṇa+dhyānād

करोति कामवशगः(ख्), कर्माण्यविजितेन्द्रियः ।

दुःखोदर्काणि सम्पश्यन्, रजोवेगविमोहितः ॥ 11॥

karoti kāmavaśagaḥ(kh), karmāṇyavijitendriyaḥ .

duḥkhodarkāṇi sampaśyan, rajovegavimohitaḥ .. 11..

kā+ mavaśagaḥ(kh), karmāṇya+ vijitendriyaḥ

duḥkho+ darkāṇi, rajovega+ vimohitaḥ

रजस्तमोभ्यां(म्) यदपि, विद्वान् विक्षिप्तधीः(फ्) पुनः ।

अतन्द्रितो मनो युं(ञ्)जन्, दोषदृष्टिर्न सज्जते ॥ 12॥

rajastamobhyāṃ(m) yadapi, vidvān vikṣiptadhīḥ(ph) punaḥ .

atandrito mano yu(ñ)ñjan, doṣadṛṣṭirna sajjate .. 12..

doṣa+dṛṣṭir+na

अप्रमत्तोऽनुयुं(ञ्)जीत, मनो मय्यर्पयञ्छनैः ।

अनिर्विण्णो यथाकालं(ञ्), जितश्वासो जितासनः ॥ 13॥

apramatto'nuyu(ñ)jīta, mano mayyarpayañchanaiḥ .

anirviṇṇo yathākālaṃ(ñ), jitaśvāso jitāsanaḥ .. 13..

apramatto'+nuyu(ñ)jīta,

mayyar+ payañ+ chanaiḥ

एतावान् योग आदिष्टो, मच्छिष्यैः(स्) सनकादिभिः ।

सर्वतो मन आकृष्य, मय्यद्धाऽऽवेश्यते यथा ॥ 14॥

etāvān yoga ādiṣṭo, macchiṣyaiḥ(s) sanakādibhiḥ .

sarvato mana ākṛṣya, mayyaddhā''veśyate yathā .. 14..

mac+ chiṣyaiḥ(s), mayyaddhā''+veśyate

उद्धव उवाच

यदा त्वं(म्) सनकादिभ्यो, येन रूपेण केशव ।

योगमादिष्टवानेतद्, रूपमिच्छामि वेदितुम् ॥ 15॥

uddhava uvāca

yadā tvaṃ(m) sanakādibhyo, yena rūpeṇa keśava .

yogamādiṣṭavānetad, rūpamicchāmi veditum .. 15..

yogamā+ diṣṭavā+ netad

श्रीभगवानुवाच

पुत्रा हिरण्यगर्भस्य, मानसाः(स्) सनकादयः ।

पप्रच्छुः(फ्) पितरं(म्) सूक्ष्मां(म्), योगस्यैकान्तिकीं(ङ्) गतिम् ॥ 16॥

śrībhagavānuvāca

putrā hiraṇyagarbhasya, mānasāḥ(s) sanakādayaḥ .

papracchuḥ(ph) pitaraṃ(m) sūkṣmāṃ(m), yogasyaikāntikīṃ(ṅ) gatim .. 16..

yogasyai+ kāntikīṃ(ṅ)

सनकादय ऊचुः

गुणेष्वाविशते चेतो, गुणाश्चेतसि च प्रभो ।

कथमन्योन्यसं(न्)त्यागो, मुमुक्षोरतितितीर्षोः ॥ 17॥

sanakādaya ūcuḥ

guṇeṣvāviśate ceto, guṇāścetasi ca prabho .

kathamanyonyasaṃ(n)tyāgo, mumukṣoratititīrṣoḥ .. 17..

guṇeṣ+ vāviśate, kathaman+ yonya+ saṃ(n)tyāgo, mumukṣo+ ratititīr+ ṣoḥ

श्रीभगवानुवाच

एवं(म्) पृष्टो महादेवः(स्), स्वयं(म्)भूर्भूतभावनः ।

ध्यायमानः(फ्) प्रश्नबीजं(न्), नाभ्यपद्यत कर्मधीः ॥ 18॥

śrībhagavānuvāca

evaṃ(m) pṛṣṭo mahādevaḥ(s), svayaṃ(n)bhūrbhūtabhāvanaḥ .

dhyāyamānaḥ(ph) praśnabījaṃ(n), nābhyapadyata karmadhīḥ .. 18..

svayaṃ(n)+ bhūrbhūta+ bhāvanaḥ, nābhya+ padyata

स मामचिन्तयद् देवः(फ्), प्रश्नपारतितीर्षया ।

तस्याहं(म्) हं(व्)सरूपेण, सकाशमगमं(न्) तदा ॥ 19॥

sa māmacintayad devaḥ(ph), praśnapāratitīrṣayā .

tasyāhaṃ(m) haṃ(v)sarūpeṇa, sakāśamagamaṃ(n) tadā .. 19..

mā+ macintayad, praśnapā+ ratitīr+ ṣayā, sakā+ śamagamaṃ(n)

दृष्ट्वा मां(न्) त उपव्रज्य, कृत्वा पादाभिवन्दनम् ।

ब्रह्माणमग्रतः(ख्) कृत्वा, पप्रच्छुः(ख्) को भवानिति ॥ 20॥

dṛṣṭvā māṃ(n) ta upavrajya, kṛtvā pādābhivandanam .

brahmāṇamagrataḥ(kh) kṛtvā, papracchuḥ(kh) ko bhavāniti .. 20..

pādā+ bhivandanam, brahmāṇa+ magrataḥ(kh)

इत्यहं(म्) मुनिभिः(फ्) पृष्टस्- तत्त्वजिज्ञासुभिस्तदा ।

यदवोचमहं(न्) तेभ्यस्- तदुद्धव निबोध मे ॥ 21॥

ityahaṃ(m) munibhiḥ(ph) pṛṣṭas- tattvajijñāsubhistadā .

yadavocamahaṃ(n) tebhyas- taduddhava nibodha me .. 21..

tattva+ jijñāsu+ bhistadā, yadavo+ camahaṃ(n), tadud+ dhava

वस्तुनो यद्यनानात्व- मात्मनः(फ्) प्रश्न ईदृशः ।

कथं(ङ्) घटेत वो विप्रा , वक्तुर्वा मे क आश्रयः ॥ 22॥

vastuno yadyanānātva- mātmanaḥ(ph) praśna īdṛśaḥ .

kathaṃ(ṅ) ghaṭeta vo viprā, vakturvā me ka āśrayaḥ .. 22..

yadya+ nānātva

पं(ञ्)चात्मकेषु भूतेषु , समानेषु च वस्तुतः ।

को भवानिति वः(फ्) प्रश्नो, वाचारम्भो ह्यनर्थकः ॥ 23॥

Paṃ(ñ)ñcātmakeṣu bhūteṣu, samāneṣu ca vastutaḥ .

ko bhavāniti vaḥ(ph) praśno, vācārambho hyanarthakaḥ .. 23..

Paṃ(ñ)ñcāt+ makeṣu

मनसा वचसा दृष्ट्या, गृह्यतेऽन्यैरपीन्द्रियैः ।

अहमेव न मत्तोऽन्य- दिति बुध्यध्वमं(ञ्)जसा ॥ 24॥

manasā vacasā dṛṣṭyā, gṛhyate'nyairapīndriyaiḥ .

ahameva na matto'nya- diti budhyadhvamaṃ(ñ)jasā .. 24..

gṛhyate'n+ yairapīn+ driyaiḥ,

budh+ yadhva+ maṃ(ñ)jasā

गुणेष्वाविशते चेतो, गुणाश्चेतसि च प्रजाः ।

जीवस्य देह उभयं(ङ्), गुणाश्चेतो मदात्मनः ॥ 25॥

guṇeṣvāviśate ceto, guṇāścetasi ca prajāḥ .

jīvasya deha ubhayaṃ(ṅ), guṇāśceto madātmanaḥ .. 25..

guṇeṣvā+ viśate, guṇāś+ cetasi

गुणेषु चाविशच्चित्त- मभीक्ष्णं(ङ्) गुणसेवया ।

गुणाश्च चित्तप्रभवा, मद्रूप उभयं(न्) त्यजेत् ॥ 26॥

guṇeṣu cāviśaccitta-mabhīkṣṇaṃ(ṅ) guṇasevayā .

guṇāśca cittaprabhavā, madrūpa ubhayaṃ(n) tyajet .. 26..

cāviśac+ citta

जाग्रत् स्वप्नः(स्) सुषुप्तं(ञ्) च, गुणतो बुद्धिवृत्तयः ।
तासां(म्) विलक्षणो जीवः(स्), साक्षित्वेन विनिश्चितः ॥ 27॥

Jāgrat svapnaḥ(s) suṣuptaṃ(ñ) ca, guṇato buddhivṛttayaḥ .
tāsāṃ(m) vilakṣaṇo jīvaḥ(s), sākṣitvena viniścitaḥ .. 27..

यर्हि सं(व्)सृतिबन्धोऽय- मात्मनो गुणवृत्तिदः ।
मयि तुर्ये स्थितो जह्यात्, त्यागस्तद् गुणचेतसाम् ॥ 28॥

yarhi saṃ(v)sṛtibandho'ya-mātmano guṇavṛttidaḥ .
mayi turye sthito jahyāt, tyāgastad guṇacetasām .. 28..

saṃ(v)sṛti+ bandho'ya

अहं(ङ्)कारकृतं(म्) बन्ध- मात्मनोऽर्थविपर्ययम् ।
विद्वान् निर्विद्य सं(व्)सार- चिन्तां(न्) तुर्ये स्थितस्त्यजेत् ॥ 29॥

ahaṃ(ṅ)kārakṛtaṃ(m) bandha- mātmano'rthaviparyayam .
vidvān nirvidya saṃ(v)sāra- cintāṃ(n) turye sthitastyajet .. 29..

mātmano'rtha+ viparyayam, sthitas+ tyajet

यावन्नानार्थधीः(फ्) पुं(व्)सो, न निवर्तेत युक्तिभिः ।
जागर्त्यपि स्वपन्नज्ञः(स्), स्वप्ने जागरणं(म्) यथा ॥ 30॥

yāvannānārthadhīḥ(ph) puṃ(v)so, na nivarteta yuktibhiḥ .
jāgartyapi svapannajñaḥ(s), svapne jāgaraṇaṃ(m) yathā .. 30..

yāvan+ nānār+ thadhīḥ(ph), jāgar+ tyapi, svapan+ najñaḥ(s)

असत्त्वादात्मनोऽन्येषां(म्), भावानां(न्) तत्कृता भिदा ।
गतयो हेतवश्चास्य, मृषा स्वप्नदृशो यथा ॥ 31॥

asattvādātmano'nyeṣāṃ(m), bhāvānāṃ(n) tatkṛtā bhidā .
gatayo hetavaścāsya, mṛṣā svapnadṛśo yathā .. 31..

asattvā+ dātmano'n+ yeṣāṃ(m), hetavaś+ cāsya

यो जागरे बहिरनुक्षणधर्मिणोऽर्थान्,
भुङ्क्ते समस्तकरणैर्हृदि तत्सदृक्षान् ।
स्वप्ने सुषुप्त उपसं(व्)हरते स एकः(स्),
स्मृत्यन्वयात्त्रिगुणवृत्तिदृगिन्द्रियेशः ॥ 32॥

yo jāgare bahiranukṣaṇadharmiṇo'rthān
bhuṅkte samastakaraṇairhṛdi tatsadṛkṣān .
svapne suṣupta upasaṃ(v)harate sa ekaḥ(S)
smṛtyanvayāttriguṇavṛttidṛgindriyeśaḥ .. 32..

bahi+ranu+ kṣaṇa+ dharmiṇo'rthān, samasta+ karaṇair+ hṛdi
smṛtyan+ vayāttri+ guṇavṛtti+ dṛgindri+ yeśaḥ

एवं(म्) विमृश्य गुणतो मनसस्त्र्यवस्था,
मन्मायया मयि कृता इति निश्चितार्थाः ।
सं(ञ्)छिद्य हार्दमनुमानसदुक्तितीक्ष्ण-
ज्ञानासिना भजत माखिलसं(व्)शयाधिम् ॥ 33॥

evaṃ(m) vimṛśya guṇato manasastryavasthā
manmāyayā mayi kṛtā iti niścitārthāḥ .
saṃ(ñ)chidya hārdamanumānasaduktitīkṣṇa-
jñānāsinā bhajata mākhilasaṃ(v)śayādhim .. 33..

manasas+ tryavasthā, hār+ damanumā+ nasadukti+ tīkṣṇa
mākhila+ saṃ(v)śayādhim

ईक्षेत विभ्रममिदं(म्) मनसो विलासं(न्),
दृष्टं(म्) विनष्टमतिलोलमलातचक्रम् ।
विज्ञानमेकमुरुधेव विभाति माया,
स्वप्नस्त्रिधा गुणविसर्गकृतो विकल्पः ॥ 34॥

īkṣeta vibhramamidaṃ(m) manaso vilāsaṃ(n)

dṛṣṭaṃ(n) vinaṣṭamatilolamalātacakram .

vijñānamekamurudheva vibhāti māyā

svapnastridhā guṇavisargakṛto vikalpaḥ .. 34..

vinaṣṭa+ matilo+ lamalāta+ cakram, vijñā+ nameka+ murudheva

svapnas+ tridhā

दृष्टिं(न्) ततः(फ्) प्रतिनिवर्त्य निवृत्ततृष्ण-

स्तूष्णीं(म्) भवेन्निजसुखानुभवो निरीहः ।

संदृश्यते क्व च यदीदमवस्तुबुद्ध्या,

त्यक्तं(म्) भ्रमाय न भवेत् स्मृतिरानिपातात् ॥ 35॥

dṛṣṭiṃ(n) tataḥ(ph) pratinivartya nivṛttatṛṣṇa-

stūṣṇīṃ(m) bhavennijasukhānubhavo nirīhaḥ .

sandṛśyate kva ca yadīdamavastubuddhyā

tyaktaṃ(m) bhramāya na bhavet smṛtirānipātāt .. 35..

prati+ nivar+ tya, bhaven+ nijasukhā+ nubhavo

yadī+ damavastu+ buddhyā, smṛtirā+ nipātāt

देहं(ञ्) च नश्वरमवस्थितमुत्थितं(म्) वा,

सिद्धो न पश्यति यतोऽध्यगमत् स्वरूपम् ।

दैवादपेतमुत दैववशादुपेतं(म्),

वासो यथा परिकृतं(म्) मदिरामदान्धः ॥ 36॥

dehaṃ(ñ) ca naśvaramavasthitamutthitaṃ(m) vā

siddho na paśyati yato'dhyagamat svarūpam .

daivādapetamuta daivavaśādupetaṃ(m)

vāso yathā parikṛtaṃ(m) madirāmadāndhaḥ .. 36..

naśvara+ mavasthita+ mutthitaṃ(m), yato'+ dhyagamat

daiva+ vaśā+ dupetaṃ(m), madirā+ madāndhaḥ

देहोऽपि दैववशगः(ख्) खलु कर्म यावत्,

स्वारम्भकं(म्) प्रतिसमीक्षत एव सासुः ।

तं(म्) स प्रपञ्चमधिरूढसमाधियोगः(स्),

स्वाप्नं(म्) पुनर्न भजते प्रतिबुद्धवस्तुः ॥ 37॥

**deho'pi daivavaśagaḥ(kh) khalu karma yāvat**

**svārambhakaṃ(m) pratisamīkṣata eva sāsuḥ .**

**taṃ(m) sa prapañcamadhirūḍhasamādhiyogaḥ(s)**

**svāpnaṃ(m) punarna bhajate pratibuddhavastuḥ .. 37..**

daiva+ vaśagaḥ(kh), prapañca+ madhirūḍha+ samādhiyogaḥ(s)

prati+ Buddha+ vastuḥ

मयैतदुक्तं(म्) वो विप्रा, गुह्यं(म्) यत् सां(ङ्)ख्ययोगयोः ।

जानीत माऽऽगतं(म्) यज्ञं(म्), युष्मद्धर्मविवक्षया ॥ 38॥

**mayaitaduktaṃ(m) vo viprā, guhyaṃ(m) yat sāṃ(ṅ)khyayogayoḥ .**

**jānīta mā''gataṃ(m) yajñaṃ(m), yuṣmaddharmavivakṣayā .. 38..**

mayai+ taduktaṃ(m), sāṃ(ṅ)khya+ yogayoḥ

yuṣmad+ dharma+ vivakṣayā

अहं(म्) योगस्य सां(ङ्)ख्यस्य, सत्यस्यर्तस्य तेजसः ।

परायणं(न्) द्विजश्रेष्ठाः(श्), श्रियः(ख्) कीर्तेर्दमस्य च ॥ 39॥

**ahaṃ(m) yogasya sāṃ(ṅ)khyasya, satyasyartasya tejasaḥ .**

**parāyaṇaṃ(n) dvijaśreṣṭhāḥ(ś), śriyaḥ(kh) kīrterdamasya ca .. 39..**

satyas+ yar+ tasya, kīrter+ damasya

मां(म्) भजन्ति गुणाः(स्) सर्वे, निर्गुणं(न्) निरपेक्षकम् ।
सुहृदं(म्) प्रियमात्मानं(म्), साम्यासं(ङ्)गादयोगुणाः ॥ 40॥

māṃ(m) bhajanti guṇāḥ(s) sarve, nirguṇaṃ(n) nirapekṣakam .
suhṛdaṃ(m) priyamātmānaṃ(m), sāmyāsaṃ(ṅ)gādayoguṇāḥ .. 40..

sāmyā+ saṃ(ṅ)gā+ dayo+ guṇāḥ

इति मे छिन्नसन्देहा, मुनयः(स्) सनकादयः ।
सभाजयित्वा परया, भक्त्यागृणत सं(व्)स्तवैः ॥ 41॥

iti me chinnasandehā, munayaḥ(s) sanakādayaḥ .
sabhājayitvā parayā, bhaktyāgṛṇata saṃ(v)stavaiḥ .. 41..

तैरहं(म्) पूजितः(स्) सम्यक्, सं(व्)स्तुतः(फ्) परमर्षिभिः ।
प्रत्येयाय स्वकं(न्) धाम, पश्यतः(फ्) परमेष्ठिनः ॥ 42॥

tairahaṃ(m) pūjitaḥ(s) samyak, saṃ(v)stutaḥ(ph) paramarṣibhiḥ .
pratyeyāya svakaṃ(n) dhāma, paśyataḥ(ph) parameṣṭhinaḥ .. 42..

paramar+ ṣibhiḥ

इति श्रीमद्भागवते महापुराणे पारमहंस्यां
संहितायां एकादशस्कन्धे त्रयोदशोऽध्यायः ॥ 13॥

iti śrīmadbhāgavate mahāpurāṇe pāramahaṃsyāṃ
saṃhitāyāṃ ekādaśaskandhe trayodaśo'dhyāyaḥ .. 13..

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्)पूर्णात्पूर्णमुदच्यते
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।
ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः।।

Om Pūrṇamadah(ph) Pūrṇamidaṃ(m) PūrṇātPūrṇamudacyate|
Pūrṇasya Pūrṇamādāya Pūrṇamevāvashiṣyate ||
Om Shāntih(ś) Shāntih(ś) Shāntih ||